# एककम् - ३



# जगदेतत् प्रकाशते ।

भारतस्य आध्यात्मिकनभोमण्डले भासमानेषु तेजःपुञ्जेषु श्रीशङ्करभगवत्पादः अद्वितीयः। अस्मिन्नेकके श्रीशङ्करस्य जीवनमधिकृत्य कश्चन लघूपन्यासः संस्कृतभाषायाः प्रभावेन महितां भारताम्बामधिकृत्य काचन कविता च आयोजितौ।

# ५. लोकशङ्करः ।

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।
नमामि भगवत्पादशङ्करं लोकशङ्करम्।।

अस्मिन् श्लोके परामृष्टः जगद्गुरुरिति प्रथितः श्रीशङ्करः क्रिस्तोः परम् अष्टाशीत्यधिकसप्तशत (A.D.788) तमे वर्षे केरलेषु कालटिग्रामे लब्धजन्माऽभूत्। स बाल्य एव मातुरनुमत्या संन्यासं स्वीचकार। वेदवेदाङ्गेषु षड्दर्शनेषु सकलेषु शास्त्रेषु च निष्णातो भूत्वा गोविन्दपादाचार्याद् अयम् अद्वैतरहस्यम् अधीतवान्। गुरोः निर्देशानुसारं प्रस्थानत्रयम् इति प्रथितानां ब्रह्मसूत्रभगवद्गीतोपनिषदां भाष्यम् अनेन रचितम्। द्वात्रिंशद्वर्षपरिमितेन स्वजीवनेन मानवजीवने अद्वैतभावनायाः प्रभावोऽस्ति इति सर्वज्ञेन अनेन निरूपितम्। अद्वैतधर्मप्रचारकस्य अस्य मनसि कर्मणि वा वर्णधर्माधिष्ठिता उच्चनीचकल्पना नासीत्।

"विद्या विनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डितास्समदर्शिनः।।"

इति गीतावचनमाचार्यः सार्थकञ्चक्रे। सर्वेषु प्राणिषु प्रकाशमानः आत्मा एक एव इति सत्यं 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिमहावाक्यानां बोधनेन सः प्रदर्शितवान्। अद्वैतमतस्थापनाय तेन अनेके ग्रन्थाः विरचिताः। तेषु विवेकचूडामणिः इति प्रसिद्धः प्रकरणग्रन्थः 'भज गोविन्दम्' इति प्रसिद्धः स्तोत्रग्रन्थः च अन्तर्भवतः।



श्रीशङ्करः जनानामुद्बोधनाय अद्वैतधर्मस्य प्रचाराय च भारतस्य चतसृषु दिक्षु चत्वारि धामानि स्थापयामास। ज्योतिर्मठः, गोवर्धनपीठं, शारदापीठं, दक्षिणाम्नायशारदापीठम् (शृङ्गेरीमठः) इति विदितानि अध्ययनकेन्द्राणि अधुनापि नितरां शोभन्ते।

एतानि केन्द्राणि देशस्य सर्वतोमुखविकासाय, ऐक्यसंस्थापनाय, सांस्कृतिक-सामञ्जस्याय च अत्यन्तमुपकुर्वन्ति।

(श्रुतिस्मृतिपुराणानाम् आलयं करुणालयं लोकशङ्करं भगवत्पादशङ्करं नमामि।)

**पदच्छेदः।**

| | | |
|---|---|---|
| अत्यन्तमुपकुर्वन्ति | - | अत्यन्तम् + उपकुर्वन्ति |
| जगद्गुरुरिति | - | जगद्गुरुः + इति |
| तत्त्वमसि | - | तत् + त्वम् + असि |
| निष्णातोभूत्वा | - | निष्णातः + भूत्वा |
| प्रभावोऽस्ति | - | प्रभावः + अस्ति |
| बाल्य एव | - | बाल्ये + एव |
| ब्रह्मास्मि | - | ब्रह्मा + अस्मि |
| मातुरनुमत्या | - | मातुः + अनुमत्या |
| लब्धजन्माऽभूत् | - | लब्धजन्मा + अभूत् |

**विग्रहाः।**

| | | |
|---|---|---|
| प्रस्थानत्रयम् | - | प्रस्थानानां त्रयम्। |
| मानवजीवने | - | मानवानां जीवने। |
| लब्धजन्मा | - | लब्धं जन्म येन, सः। |
| वर्णधर्माधिष्ठिता | - | वर्णान् धर्मान् च अधिष्ठिता। |
| वेदवेदाङ्गेषु | - | वेदाश्च वेदाङ्गानि च तेषु। |

**किं करणीयम् ?**

❖ उदाहृतानुसारं पाठाद् वाक्यानि चित्वा पट्टिकायां निवेशयतु। ततः द्वित्राणि वाक्यानि च स्वयं लिखतु।

| क्त प्रत्ययान्तपदानि (भूतकालार्थे कर्मणि) | क्तवतु प्रत्ययान्तपदानि (भूतकालार्थे कर्तरि) |
|---|---|
| उदा - भाष्यम् अनेन रचितम् | अयम् अद्वैतरहस्यम् अधीतवान्। |

❖ लोकहितैकतत्पराणां द्वित्राणां महात्मनां जीवनवृत्तान्तं समाहृत्य सम्पुटरूपेण प्रकाशयतु।

**श्रद्धेयाः अंशाः।**

- विषयस्य औचित्यम्।
- वाक्यघटना।
- जीवनचरितस्य घटना।

❖ चित्रं निरीक्ष्य शङ्कराचार्यस्य जीवने इयं घटना का इति अवगम्य टिप्पणीं लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- घटनायाः औचित्यम्।



## चित्रकथां पठतु। रिक्तान् संभाषणांशान् पूरयतु।




पञ्चमे वयसि कृतोपनयनः ब्रह्मचारी शङ्करः भिक्षार्थम् इतस्ततः अचरत्।
भिक्षार्थी ब्रह्मचारी? अतितेजस्वी बालः।
किन्नु करिष्ये? तण्डुलकणोपि अत्र नास्ति।
शुष्कमेकम् आमलकम्। आ! एतदेव दास्यामि।
तस्याः दैन्यं दृष्ट्वा शङ्करः ऐश्वर्यदेवतां लक्ष्मीं कनकधारास्तवेन स्तौति स्म।
सुवर्णामलकवृष्टिः
अध्ययनानन्तरं अष्टवर्षीयः शङ्करः एकदा स्नानाय पूर्णानदीं प्राप।


3
मातः! ग्राहः! ग्राहः! संन्यासाय अनुज्ञां ददातु! तर्हि ग्राहात् मुक्तो भवामि।
पुत्र! भगवानेव त्वां रक्षितवान्। संन्यासं स्वीकुरु।
सः नर्मदानदीतटं प्राप। गोविन्दाचार्यस्य शिष्यत्वं स्वीकृत्य ब्रह्मसूत्रार्थम् अधीत।
पश्चात् शङ्करः स्वशिष्यान् उद्बोधयद् उपनिषद्व्याख्यानि।
कदाचित् शङ्करः शिष्यैस्सह काशीं प्राप। कश्चन चण्डालः चतुर्भिः श्वभिः साकं तत्राजगाम।
हे ब्रह्मन् देहं वा आत्मानं वा दूरं अपसारयितुम् इच्छति?


4
सर्वेषां आत्मा एक एव।
सत्यमुक्तं लुब्धकेन। आत्मा सर्वव्यापी, निष्क्रियः, नित्यशुद्धः, निराबाधः।
सन्तुष्टोऽस्मि।
चण्डालः अप्रत्यक्षोऽभवत्।
एवम् अद्वैततत्त्वमधिगम्य व्यासतीर्थं प्राप। ततः ब्रह्मसूत्रस्य भगवद्गीतायाः उपनिषदः च भाष्याणि रचयामास।
अद्वैतधर्मप्रचाराय, तथा देशीयोद्ग्रथनाय च तेन भारतदेशस्य चतसृषु दिक्षु चत्वारि धामानि स्थापितानि।

# ६. भारतं महीयते ।

भारतं महीयते संस्कृतप्रभावेन
सागरानतिक्रम्य श्रेयोऽपि प्रसरति।
वेदशास्त्राणां पुराणेतिहासानां जन्म-
गेहमित्यतः पुण्यदेशोऽयं विराजते।।१।।

भारतं महीयते विज्ञानधनैरस्य
वाङ्मयं महत्तरं विपुलं विश्वोत्तरम्।
दीर्घदर्शिभिर्महामुनिभिरुपार्जितम्
क्रान्तदर्शिभिर्महाकविभिरुदीरितम्।।२।।

आदिमं काव्यं रघुरामस्य चरितं हि
वाल्मीकिप्रकीर्तितं काव्येषु महत्तरम्।
ऐतिहासिकं व्यासभारतं विश्वोत्तरम्
ऐहिकमामुष्मिकं सर्वमत्रास्ति नूनम्।।३।।

भगवद्गीतामृतं जीवनप्रदायकं
जगति विशिष्यते तत्त्वशास्त्राणां मध्ये।
कालिदासाद्यैर्महाकविभिः प्रणीतानि
काव्यनाटकादीनि कल्पान्तस्थायीनि च।।४।।

भारतं विशिष्यते विश्वदर्शनेनास्य
संस्कृतेर्महत्त्वं तत् प्रशस्तं महीतले।
विश्वमानवास्सन्ति भारतीयास्तु नित्यं
विश्वसौहार्दं तेषामीप्सितं शुभकरम्।।५।।

**अन्वयः।**

1. संस्कृतप्रभावेन भारतं महीयते। सागरान् अतिक्रम्य श्रेयः अपि प्रसरति। वेदशास्त्राणां पुराणेतिहासानां जन्मगेहम् इत्यतः अयं पुण्यदेशः विराजते।

2. दीर्घदर्शिभिः महामुनिभिःउपार्जितं क्रान्तदर्शिभिः महाकविभिः उदीरितं वाङ्मयं महत्तरं विपुलं विश्वोत्तरम् (च भवति)। अस्य विज्ञानधनैः भारतं महीयते।

3. काव्येष्वादिमं काव्यं वाल्मीकिप्रकीर्तितं रघुरामस्य चरितं महत्तरं हि। ऐहिकम् आमुष्मिकं सर्वम् अत्र अस्ति नूनम् (इति कारणेन) ऐतिहासिकं व्यासभारतं विश्वोत्तरम् भवति।

4. तत्त्वशास्त्राणां मध्ये भगवद्गीतामृतं जगति जीवनप्रदायकं विशिष्यते। कालिदासाद्यैः महाकविभिः प्रणीतानि काव्यनाटकादीनि कल्पान्तस्थायीनि च (भवन्ति)।

5. भारतं विश्वदर्शनेन विशिष्यते। तद् अस्य संस्कृतेः महत्त्वं महीतले प्रशस्तं (करोति)। भारतीयाः तु विश्वमानवाः सन्ति। तेषाम् ईप्सितं नित्यं शुभकरं विश्वसौहार्दम् (अस्ति)।

**पदच्छेदः।**

| | | |
|---|---|---|
| तेषामीप्सितम् | - | तेषाम् + ईप्सितम् |
| दीर्घदर्शिभिर्महामुनिभिरुपार्जितम् | - | दीर्घदर्शिभिः + महामुनिभिः + उपार्जितम् |
| पुण्यदेशोऽयम् | - | पुण्यदेशः + अयम् |
| भारतीयास्तु | - | भारतीयाः + तु |
| विज्ञानधनैरस्य | - | विज्ञानधनैः + अस्य |
| विश्वमानवास्सन्ति | - | विश्वमानवाः + सन्ति |
| श्रेयोऽपि | - | श्रेयः + अपि |
| संस्कृतेर्महत्त्वम् | - | संस्कृतेः + महत्त्वम्। |

**विग्रहाः।**

| | | |
|---|---|---|
| आमुष्मिकम् | - | अमुष्मिन् भवम्। |
| ईप्सितम् | - | आप्तुम् इष्टम्। |
| ऐतिहासिकम् | - | इतिहासे भवम्। |
| ऐहिकम् | - | इह भवम्। |
| वाङ्मयः | - | वाचां विकारः। |
| सौहार्दम् | - | सुहृदः भावः। |

## किं करणीयम् ?

❖ 'भारतं महीयते' इति कवितां तालानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- उचितः तालः।
- आशयावगतिः।

❖ 'भारतं महीयते' इति कविता पठिता किल। कवितायां परामृष्टानां ग्रन्थानां पट्टिकां विशदया रीत्या सज्जीकरोतु।

| ग्रन्थनाम | कविः | प्रतिपाद्यम् | काण्ड/सर्ग/ पर्व/अध्यायः |
|---|---|---|---|
| | | | |

❖ 'केरलाः महीयन्ते' इति शीर्षके कवितान्तरं रचयतु।

**सूचनाः**

प्रकृतिसौन्दर्यम्।

संस्कृतसाहित्याय योगदानानि ।

धर्मसमभावना।

कार्षिकवृत्तिः।

**श्रद्धेयाः अंशाः।**

- उचितः तालः।
- आशयावगतिः।

## अनुबन्धः।

**शब्दकोशः।**

| | | | |
|---|---|---|---|
| ईप्सितम् | अभिलषितम् | ആഗ്രഹിച്ചത് | desired |
| उद्बोधनाय | अवगमयितुं | ഉദ്ബോധിപ്പിക്കുന്നതിന് | to make conscientize |
| उपकुर्वन्ति | उपकारं कुर्वन्ति | ഉപകരിക്കുന്നു | helpful |
| क्रान्तदर्शिनः | सूक्ष्मदर्शिनः | ക്രാന്തദർശികൾ | seers |
| चकार | अकरोत् | ചെയ്തു | did |
| चरितम् | उदन्तः | കഥ | story |
| धामानि | स्थानानि | സ്ഥാനങ്ങൾ | places |
| निरूपितम् | प्रतिपादितम् | നിശ്ചയിക്കപ്പെട്ടു | determined |
| निष्णातः | समर्थः | സമർത്ഥൻ | able |
| परामृष्टः | सूचितः | സൂചിപ്പിക്കപ്പെട്ട | indicated |
| पुण्यदेशः | पावनभूमिः | പവിത്രഭൂമി | holyland |
| प्रचाराय | प्रचारणाय | പ്രചരിപ്പിക്കുന്നതിന് | for campaign ing |
| विराजते | शोभते | ശോഭിക്കുന്നു | shines |
| श्वपाकः | चण्डालः | ചണ്ഡാളൻ | hunter |
| श्वा | शुनकः | നായ | dog |

| | | | |
|---|---|---|---|
| समाजः | समूहः | സമൂഹം | society |
| स्थापयामास | स्थापितवान् | സ്ഥാപിച്ചു | founded |
| सर्वदा | सदा | എപ്പോഴും | always |
| सागरः | समुद्रः | കടൽ | sea |
| हेतुः | कारणम् | കാരണം | reason |

## अमरकोशः।

समाजः समाजोऽथ सधर्मिणाम्।

विदितम् विदितप्रतिपन्नमवसितावगते।

### व्याकरणविशेषः

तेषामीप्सितम् - तेषाम् आप्तुम् इष्टम्। वर्तमानार्थक क्त प्रत्यययोगे कर्तरि षष्ठी।

## अव्ययानि।

नितराम् / अत्यन्तम् — कविषु कालिदासः नितरां / अत्यन्तं प्रसिद्धः।

## शब्दरूपाणि।

**सर्वनाम मकारान्तः 'इदम् ' शब्दः पुंसि।**

| **विभक्तिः** | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम्, एनम् | इमौ, एनौ | इमान्, एनान् |
| तृतीया | अनेन, एनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः, एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः, एनयोः | एषु। |

**स्त्रियाम् -**

| **विभक्तिः** | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | इयम् | इमे | इमाः |
| द्वितीया | इमाम्, एनाम् | इमे, एने | इमाः, एनाः |
| तृतीया | अनया, एनया | आभ्याम् | आभिः |
| चतुर्थी | अस्यै | आभ्याम् | आभ्यः |
| पञ्चमी | अस्याः | आभ्याम् | आभ्यः |
| षष्ठी | अस्याः | अनयोः, एनयोः | आसाम् |
| सप्तमी | अस्याम् | अनयोः, एनयोः | आसु। |

**क्लीबे -**

| **विभक्तिः** | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | इदम् | इमे | इमानि |
| द्वितीया | इदम्, एनम् | इमे, एने | इमानि, एनानि |
| | शेषं पुंवद्। | | |

**धातुरूपाणि।**

चक्रे - डु कृञ् करणे - लिट्. आ.प.प्र.पु.ए.व.

| **पुरुषः** | **एकवचनं** | **द्विवचनं** | **बहुवचनम्** |
|---|---|---|---|
| प्र.पु. | चक्रे | चक्राते | चक्रिरे |
| म.पु. | चकृषे | चक्राथे | चकृढ्वे |
| उ.पु. | चक्रे | चकृवहे | चकृमहे। |

डु कृञ् करणे - लिट्. प. प.

| | | | |
|---|---|---|---|
| प्र.पु. | चकार | चक्रतुः | चक्रुः |
| म.पु. | चकर्थ | चक्रथुः | चक्र |
| उ.पु. | चकार, चकर | चकृव | चकृम। |

# किमधिगतम् ?

## जीवनचरितस्य लेखनम्

| | स्वयं साधु कृतम् | सुहृदः साहाय्येन कृतम् | परिष्करणीयं वर्तते |
|---|---|---|---|
| द्वयोःजीवनचरितं सञ्चितम् | | | |
| जीवनचरितस्य घटनाः पालिताः | | | |
| आशयस्य पूर्णता | | | |
| उचिता वाक्यघटना | | | |

## चित्रकथायाः पूरणम्

| | | | |
|---|---|---|---|
| चित्रकथा सम्यक् पठिता | | | |
| उचिताः संभाषणांशाः योजिताः | | | |
| संबोधनानि योजितानि | | | |

## कवितायाः आलपनम्

| | | | |
|---|---|---|---|
| उचितः तालः स्वीकृतः | | | |
| आशयस्य अवगतिः | | | |
| अक्षरस्फुटता पालिता | | | |

## केरलाः महीयन्ते - कविता रचना

| | | | |
|---|---|---|---|
| सूचनाः स्वीकृताः | | | |
| उचितः तालः स्वीकृतः | | | |
| आशयस्य अवगतिः | | | |